Shree Raghunath Sanskrit Research Institute Library,
Jammu

No. 6059

Title श्रृंगारतिलकम्

Author कालिदासः

Extent २ Age

Subject काव्यम् पूर्ण

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ७५१-घ

शृंगारतिलकम् (संपूर्णम्)

(काव्यम्)

नं० ७५१-घ

पत्रे २ (द्वावेव)

पत्रे २

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ श्रीगणेशाय नमः ॐ बाहू द्वौ च मृणालमास्यकमलं लावण्यलीलाजलं श्रोणीतीर्थशि-
लं च नेत्रशफरं धम्मिल्लशैवालकं कांतायाः स्तनचक्रवाकयुगलं कंदर्पबाणानलैः द-
ग्धानामवगाहनाय विधिना रम्यं सरो निर्मितं १ आयाता मधुयामिनी यदि पुनर्नायात एव
प्रभुः प्राणा यांतु विभावसौ यदि पुनर्जन्मग्रहः प्रार्थये व्याधः कोकिलबंधने विधुमुखे-
विध्वंसे चकोरः स्फुटं कंदर्पो हरनेत्रदीपितशिरः प्राणेश्वरो मन्मथः २ इंदीवरेण नयनं मुखम-
म्बुजेन कुंदेन दंतमधरं नवपल्लवेन अंगानि चंपकदलैः स विधाय धाता कांते कथं
घटितवानुपलेन चेतः ३ एकोपि खंजनवरो नलिनीदलस्थो दृष्टः करोति चतुरंगबला-
धिपत्यं किं वा करिष्यति भवद्वदनारविंदे जानामि नो नयनखंजनयुग्ममेतत् ४ ये
ये खंजनमेव कमलोपरि पश्यंति दैवात्क्वचित्ते सर्वे कवयो भवंति सहसा तां प्रख्यातभूमीभुजैः
तद्वक्त्रांबुजनेत्रखंजनयुगं पश्यंति ये ये जनास्ते ते मन्मथबाणतापविधुरा नाश्चर्यमेकिमि-
त्यद्भुतं ५ कटितटप्रविभागे हेमावलिश्लिष्टकांते यद्गुणसमये लावर्तते शीतरश्मेः
ग्रथितसुविमलकांते वीक्ष्य त्वन्नं स राहुर्ग्रसति तव मुखेंदुं पूर्णचंद्रं विहाय ६ कस्तूरी
वरपत्रभंगनिकरो भ्रष्टो न गंडस्थले नो लग्नं सखि चंदनं स्तनतटे धौतं न नेत्रांजनं रागो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सूति
नोचलितमस्तवाधरपुटे तांबूलसंवर्द्धितः किं रुष्टासि गजेंद्रमत्तगमने किं वा शिशुस्ते पतिः ७
सम्मापाने कांते कथमपि च कालेन बहुना कथाभिर्देशानां सखि रजनिरर्द्धं गतवती त
तो यावल्लीलाकलहकुपितास्मि प्रियतमे सपत्नीव प्राचीदिगियमभवत्तावदरुणा ८ ।
स्नाच्योनीरसकाष्टताडनशतं स्नाच्याः प्रचंडातपाः क्लेशाः स्नाच्यतराः सपंकनिचयैः स्नाच्योति
दाहोनलैः यत्कांताकुचपार्श्वबाहुलतिकाकल्लोललीलासुखं लब्धुं कुंभवरत्वया न हि
सुखं दुःखैर्विना लभ्यते ९ किं किं वक्रमुपैत्यपास्यसि वलान्निर्लज्जलज्जाकृते वस्त्रांतं शठ
मुंच मुंच शपथैः किं धूर्त निर्वंचसे खिन्नाहं तव रात्रिजागरवशात्तामेव याहि प्रियां निर्मा
ल्यांकितपुष्पदाममनिकरां श्लेषप्रदानाररतिं १० वाणिज्येन गतः स मे गृहपतिर्वार्तापि न
श्रूयते प्रातस्तज्जननी प्रसूततनया जामातृगेहं गता बालाहं नवयौवना निशि कथं स्था
तव्यमेकाकिनी सायं संप्रति वर्तते पथिक स्थानांतरं गम्यतां ११ यामिन्येषा बहुलज
लदैर्वर्धमानांधकारा निद्रायातो मम पतिरसौ क्लेशितः कर्मखेदैः बालाचाहं मनसि
जभयात्प्राप्तगाढप्रकंपा ग्रामश्चौरैरयमुपहतः पांथ निद्रां जहीहि १२ यांयं वा ध्यायु
ते वालाभूरस्या कार्मुकायते कटाक्षास्त्रधारायते मनो मे हरिणायते १३ कुभ्रातश्चलितो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्निग्धैयक मन्दं किं तत्र शंसाम्येतज्जो किं तेनास्ति मन्देन तु प्रियतमा सर्वांगदं दहति या वा तें तन्व्याः
चक्रुंभमर्दनवशात्स्मितं च वक्त्रामृतात् । श्लेष्माणं विनिहंति दंतस्मरतव्यापारकेलिश्रमा
त्तु. १७ दृष्टिं देहि दिव नवीलेकमलायतलोचने सूयते हि दिव रालोके विषस्य विषमौषधं १८
ग्रंतर्गतामदनवह्निशिखावलीढा सा वाध्यते किमिह चंदनपंकलेपैः यः कुंभकार
पचितो परिपंकलेपः नापाय केवलमसौ न च वह्निशांत्यै १९ यासां हृष्टा नयनयुगलं
पगवारंगनानां देशाभ्यागोमरमहूतिभिः कुसुमसौरकारि तासामेव स्तनयुगजिताः
कुंभिनः संति मत्याः प्रायो मूर्खाः परिभवविधौ नाभिमानं जहाति २० अपूर्वो हि धपते
वह्निः कामिन्याः स्तनमंडले हरतो दहते गात्रं गात्रलग्नस्तु शीतलः २१ कथमेतत्कु
चद्वंद्वं पतितं नव सुंदरि पषणाधःखनना न्मूढ गिरयोः न पतंति किं २२ कुसु
मे कुसमोत्पत्तिः सूयते न च हृ धपते वाले तव सुखांभोजे हृष्टमिंदीवरद्वयं २३
पतत्पयोधरयुगं पतितं निरीक्ष्य खेदं स्पृशावदसि किं कमलायताक्षि लब्धो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

शृंति· विवेकरहितोजननतापकारी अस्मच्छितोपिपततीह किमत्रचित्रं अयिमन्मथचू·
२ तमंजरि अथवाश्यापतचारुलोचने अपहृत्यमनः क्वयासित ॥ किंनगारिथ
2 स्त्व किमत्रप्रवर्तते २२ कोपस्त्वयायदिकृतोयदिपंकजाक्षि सोस्तिप्रियस्त।
वकिमस्तिविधेयमन्यत् आश्लेषमर्पयमदर्पितपूर्वमुच्चैरुच्चैः। समयमदर्पि
तद्विताति स्तनतुवितनुवाचंमुंचमौनंत्वमद्यप्रणिपतितमयिमानेकिंकरेकिंक
रोषि अथयदितवाचितेमापराधोस्मिबालेनिजभुजयुगवल्लीपाशबंधंविधेहि २४ ये
कान्तस्थितास्त्विकरभोरुवनेनिशीथे प्राणाधिपोवसतियत्रमनःप्रियोमे एका
किनीवदकथंनविभेषिकालाद्धृदिस्थितःशिवशरोमदनःसहायः इतिश्रीक
विकालिदासकृताश्शृंगारतिलकंसम्पूर्णं शुभम
स्वलेखिकपाठकयोः रामः ॥
ॐ ॥ ॐ ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative